Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 3 | ISSN : 2581- 6306

# तद्धिताधिकारे अपत्यर्थविचार:

अन्नपूर्णा कर
शोधछात्रा:, व्याकरणविभाग:,राष्टियसंस्कृतविश्वविद्यालय:, तिरूपति:

**Article Info**
**Publication Issue :**
May-June-2023
Volume 6, Issue 3
**Page Number :** 74-76
**Article History**
Received : 20 May 2023
Published : 30 June 2023

**शोधसारांश:** - तद्धिते पक्षद्वयं वर्तते। एक: प्रातिपदिकात् तद्धितोत्पतिपक्ष:, अपर: सुबन्तात् तद्धितोत्पतिपक्ष:। तत्रय स्वार्थप्रत्यया: भवन्ति तत्र प्रातिपदिकात् सुबुत्पत्तिपक्ष:। अस्य सर्वत्र सुबन्तात् तद्धितोत्पत्ति: ज्ञेया। अत: तद्धितप्रयोगसाधुत्वप्रदर्शनवेलायां 'प्रातिपदिकत्वात् सुपो लुकि' इवं सर्वमेव ध्येयम् ।

**मुख्यशब्दा:** – तद्धिताधिकार:, अपत्यर्थविचार:, समर्थ:, पदविधि:, अपर:।

**समर्थानां प्रथमाद्वा**[1] । अत्र 'समर्थानां प्रयमात् वा ' इति पदत्रयं विद्यते पदत्रये स्वरितत्वप्रतिज्ञाबलाच्च प्रादिशोविभक्ति:' इति सूत्रं यावत् पदत्रयमनुवर्तते । तदुत्तरं तु वा इत्यस्यैव अनुवृत्तिर्भवति ।

ननु समर्थ: पदविधि: इत्यत: समर्थपदानुवृत्त्यैव सिद्धे सूत्र समर्थानामिति व्यर्थमिति चेन्न पदविधित्वाभावात्। नच 'घकालतनेषु' इत्यादौ अलुग्विधानसामर्थात् सुबन्तात्तद्धितोत्पत्ते: सिद्धान्तिततत्वात् तस्य पदविधित्वस्य सुलभत्वात् इति वाच्यम्' परिनिष्ठितत्वरूपसामर्थ्यग्रहणाय समर्थपदस्यावश्यकत्वात्। परिनिष्ठितत्वं च कृतसन्धिकार्यमित्यर्थ: । तेन सु शोभन: उपस्थित: इति विग्रहे प्रादि समासे प्रातिपदिकत्वे सुपो लुकि सवर्णदीर्घे उत्थितस्यापत्यं इति विहे **'अत इञ्**[2] इति इञि तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भस्येति चे'ति अकारलोपे विभक्तिकार्ये सौस्थिति: इति सिद्ध्यति । अन्यथा सु उत्थित इत्यव स्थायाम् सवर्णदीर्घात् परत्वादादिवृद्धौ आवादेशे सावुत्थति: इति स्यात् । नच अन्तरंगत्वात् सवर्णदीर्घे इञि सिद्धमिति वाच्यम्, अमृतव्यूहपरिभाषया अन्तर ङ्गस्यापि सवर्णदीर्घस्य आदिबुद्धे: प्रागप्रवृत्ते: । अत आह मूले अकृतव्यूहपरिभाषया सावुत्थिति: माभूत ।

**आश्वपतम्**- यमित्यर्थे **'तस्यापत्यम्'**[3] इत्यपत्यार्थे **'अश्वपत्यादिभ्यश्च'**[4] इति सूत्रेण अणि सुबन्तात् तद्धितोत्पत्ति: इति पक्षे 'अश्व- पति ङस् अन्' इति जाते **'कृत्तद्धितसमासाश्च'**[5] इति तद्धितान्तत्वात् प्रातिपदिकत्वे **'सुपो धातुप्राविपदिकयो:'**[6]

1. अष्टा. 4-1-82
2. अष्टा. 4-1-95
3. अष्टा..4-1-92
4. अष्टा 4-1-84
5. अष्टा.1-2-46

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

इति सुपो लुकि अणो णकारस्येत्संज्ञायां लोपे च कुते **'तद्धितेष्वचामादेः'**[7] इत्यादिवृद्धौ **'यचि भम्'**[8] इति भत्वे 'यस्येति च' इति इकारलोपे 'आश्वपत 'इति जाते एकदेशविकृतन्यायेन सौ सोरमि पूर्वरूपे आश्वपतम् इति सिद्धम् ।

**गाणपतम्** - गणपतेरपत्यमिति अपत्येऽर्थे 'अश्वपत्यादिभ्यश्च' इति प्रातिपदिकत्वात् सुपो लुकि **'तद्धितेष्वचामादेः'** इति आदिवृद्धौ 'यस्येति च' इतीकारलोपे विभक्तिकार्ये सिद्धम् ।

**दैत्यः** - दितेरपत्यमिति विग्रहे **'दित्यदित्यादित्यपत्युत्तपदाण्ण्यः'**[9] इति सूत्रेण ष्यप्रत्यये प्रातिपदिकत्वात् सुपो लुकि **'चूटू'**[10] इति णकारस्येत्संज्ञायां लोपे च कृते 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ **'यस्येति च'**[11] इति इकारलोपे विभक्तिकार्ये दैत्यः इति सिद्धम् ।

**आदित्यः** – अदितेरपत्यमिति विग्रहे अदितिशब्दात् 'दित्यदित्यादित्यपत्युत्तरपदाच्ण्यः' इति ण्यप्रत्यये आदिवृद्धौ इलोपे विभक्तिकायर्ये तत्सिद्धिः ।

**बाह्यः, बाहीकः**– बहिर्भवः इति विग्रहे बहिष् शब्दात् **'बहिषष्टिलोपोयञ्च'** इति वातिकेन टिलोपे यञि प्रत्ययेऽनुबन्धलोपे च कृते आदिवृद्धौ सौ रूत्वे विसर्गे बाह्यः इति रूपम् । पक्षे 'ईकक्च' इति वार्तिकेन ईकप्रत्यये टिलोपे **'किति च'**[12] इत्यनेन आदेरचो वृद्धौ प्रातिपदिकत्वेन सौ रुत्वे विसर्ग बाहीकः इति सिद्धम् ।

**पार्थिवा** - पृथिव्याः अपत्यादीति विग्रहे 'पृथिव्या ञञौ' इति कार्तिकेन ञप्रत्यये प्रातिपदिकत्वात् सुपो लुकि 'तद्धित्तेष्वचामादेः' इत्यादिवृद्धौ पररत्वे 'यस्येति च' इति इकारलोपे अदन्तत्वात् टापि विभक्तिकार्ये 'पार्थिवा' इति । अञि पक्षे **'टिड्ढाणञ् -'**[13] इति ङीपि 'पार्थिवी इति सिद्धघति ।

**अश्वत्थामः-** अश्वस्य इव स्थामा यस्येति विग्रहे समासे अश्वस्थामन् शब्दात् अकारप्रत्यये **'नस्तद्धिते'** [14]इति टिलोपे पृषोदरादित्वात् सस्य तकारे अश्वत्थामः इति पक्षे 'भवार्थे सुग्वाच्यः' इत्यनेन अकारप्रत्ययस्य लुकि सौ दीर्घे सुलोपे नलोपे अश्वत्थामा इति सिद्धम् ।

**उडुलोमाः-** उडूनि नक्षत्राणीव लोमानि यस्य सः उडुलोमा , तस्यापत्यादि इति विग्रहे **'लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः'** इति वार्तिकेन अकारप्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'नस्तद्धिते' इति टिलोपे प्रथमाबहुवचने जसि सवर्णदीर्घे सस्य रुत्वे विसर्गे उडुलोमाः इति। केवलस्य लोम्नः अपत्ययोगासम्भवात् प्रत्ययविधित्वेऽपि तदन्तविधिः।

---

[6]. अष्टा.2-4-71

[7]. अष्टा.1-4-18

[8]. अष्टा.1-4-18

[9]. अष्टा. 4-1-85

[10]. अष्टा.1-3-7

[11]. अष्टा.6-4-148

[12]. .अष्टा.7-2-118

[13]. अष्टा.4-1-15

[14]. अष्टा.6-4-144

**औहुलोमि**:-उडुलोम्नः अपत्यमिति विग्रहे बहुत्वाऽभावात् लोम्नोऽपत्येषु बहुष्वकारो वक्तव्य:' इति वार्तिकस्याप्रवृत्त्या बाह्वादित्वादिञि प्रातिपदिकत्वात् सुलोपे 'नस्तद्धिते' इति टिलोपे 'तद्धितेष्वचामादे:' इत्यादिवृद्धौ सौ रुत्वे विसर्गे सिद्धम् ।

**औत्स**:- उत्सस्यापत्यम् इति उत्सशब्दात् **'उत्सादिभ्योऽञ्** ' [15]इति सुत्रेण अञ् प्रत्ययेऽनुबन्धलोपे 'तद्धितेष्वचामादे:' इति आदिवृद्धौ भत्वेन अकारलोपे 'कृत्तद्धितसमासाश्च ' इति प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे औत्सः इति सिद्धम्।

**गव्यम्** - गोरपत्यादि गव्यम् । 'गोरजादिप्रसङ्गे यत्' इति गोशब्दात् यति 'वान्तो यि -' इति अवादेशे विभक्तिकर्ये 'गव्यम् ' इति ।

**कालेयम्** - कलेरपत्यमिति विग्रहे **'अग्निकलिभ्यां ढग्वक्तव्य**:' इति ढकि इस्य एयादेशे कित्त्वादादिवृद्धौ 'यस्येति च' इटि इकारलोपे विभक्तिकार्ये कालेयम् इति सिद्धम् ।

## परिशीलितग्रन्थसूची


1. **व्याकरणमहाभाष्यम्** -श्री भार्गवशास्त्रिण–चौखम्बा संस्कृत प्रतिष्ठा, दिल्ली।
2. **वैयाकरणसिद्धान्तकौमुदी**- श्रीगोपालदत्त पाण्डेय: – चौखम्बा सुरभारती प्रकाशन,
3. **वैयाकरणसिद्धान्तकौमुदी**- लक्ष्मी शर्मा – चौखम्बा सुरभारती प्रकाशन,वाराणासी।
4. **परिभाषेन्दुशेखर**: **–** आचार्य विश्वनाथ मिश्र – चौखम्बासुरभारतीप्रकाशन,वाराणासी।
5. **पाणिनीय अष्टाधायी पाठ**: – स्वामी प्रह्लाद गिरि वेदान्तकेशरी – चौखम्बासुरभारती प्रकाशन, वाराणासी


[15]. **अष्टा. 4 -1-86**